# Arjunakritam 2 Shri Krishna Stotram

# અર્જુનકૃતં ૨ શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Arjunakritam 2 Shri Krishna Stotram

File name : arjunakRRitaM2shrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | AraNyakaparva | adhyAya 13/10-36||

Latest update : October 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 18, 2025

*sanskritdocuments.org*

# અર્જુનકૃતં ૨ શ્રીકૃષ્ણસ્તોત્રમ્

અર્જુન ઉવાચ ।
દશ વર્ષસહસ્રાણિ યત્ર સાયં ગૃહો મુનિઃ
વ્યચરસ્ત્વં પુરા કૃષ્ણ પર્વતે ગન્ધમાદને ॥ ૧૦॥

દશ વર્ષસહસ્રાણિ દશ વર્ષશતાનિ ચ ।
પુષ્કરેષ્વવસઃ કૃષ્ણ ત્વમપો ભક્ષયન્પુરા ॥ ૧૧॥

ઊર્ધ્વબાહુર્વિશાલાયાં બદર્યાં મધુસૂદન ।
અતિષ્ઠ એકપાદેન વાયુભક્ષઃ શતં સમાઃ ॥ ૧૨॥

અપકૃષ્ટોત્તરાસઙ્ગઃ કૃશો ધમનિસન્તતઃ ।
આસીઃ કૃષ્ણ સરસ્વત્યાં સત્રે દ્વાદશવાર્ષિકે ॥ ૧૩॥

પ્રભાસં ચાપ્યથાસાદ્ય તીર્થં પુણ્યજનોચિતં
તથા કૃષ્ણ મહાતેજા દિવ્યં વર્ષસહસ્રકં
આતિષ્ઠસ્તપ એકેન પાદેન નિયમે સ્થિતઃ ॥ ૧૪॥

ક્ષેત્રજ્ઞઃ સર્વભૂતાનામાદિરન્તશ્ચ કેશવ ।
નિધાનં તપસાં કૃષ્ણ યજ્ઞસ્ત્વં ચ સનાતનઃ ॥ ૧૫॥

નિહત્ય નરકં ભૌમમાહૃત્ય મણિકુણ્ડલે ।
પ્રથમોત્પાદિતં કૃષ્ણ મેધ્યમશ્વમવાસૃજઃ ॥ ૧૬॥

કૃત્વા તત્કર્મ લોકાનામૃષભઃ સર્વલોકજિત્ ।
અવધીસ્ત્વં રણે સર્વાન્સમેતાન્દૈત્યદાનવાન્ ॥ ૧૭॥

તતઃ સર્વેશ્વરત્વં ચ સમ્પ્રદાય શચીપતેઃ ।
માનુષેષુ મહાબાહો પ્રાદુર્ભૂતોઽસિ કેશવ ॥ ૧૮॥

સ ત્વં નારાયણો ભૂત્વા હરિરાસીઃ પરન્તપ ।
બ્રહ્મા સોમશ્ચ સૂર્યશ્ચ ધર્મો ધાતા યમોઽનલઃ ॥ ૧૯॥

વાયુર્વૈશ્રવણો રુદ્રઃ કાલઃ ખં પૃથિવી દિશઃ ।
અજશ્ચરાચરગુરુઃ સ્રષ્ટા ત્વં પુરુષોત્તમ ॥ ૨૦॥

તુરાયણાદિભિર્દેવ ક્રતુભિર્ભૂરિદક્ષિણૈઃ ।
અયજો ભૂરિતેજા વૈ કૃષ્ણ ચૈત્રરથે વને ॥ ૨૧॥

શતં શતસહસ્રાણિ સુવર્ણસ્ય જનાર્દન ।
એકૈકસ્મિંસ્તદા યજ્ઞે પરિપૂર્ણાનિ ભાગશઃ ॥ ૨૨॥

અદિતેરપિ પુત્રત્વમેત્ય યાદવનન્દન ।
ત્વં વિષ્ણુરિતિ વિખ્યાત ઇન્દ્રાદવરજો ભુવિ ॥ ૨૩॥

શિશુર્ભૂત્વા દિવં ખં ચ પૃથિવીં ચ પરન્તપ ।
ત્રિભિર્વિક્રમણૈઃ કૃષ્ણ ક્રાન્તવાનસિ તેજસા ॥ ૨૪॥

સમ્પ્રાપ્ય દિવમાકાશમાદિત્યસદને સ્થિતઃ ।
અત્યરોચશ્ચ ભૂતાત્મન્ભાસ્કરં સ્વેન તેજસા ॥ ૨૫॥

સાદિતા મૌરવાઃ પાશા નિસુન્દનરકૌ હતૌ ।
કૃતઃ ક્ષેમઃ પુનઃ પન્થાઃ પુરં પ્રાગ્જ્યોતિષં પ્રતિ ॥ ૨૬॥

જારૂથ્યામાહુતિઃ ક્રાથઃ શિશુપાલો જનૈઃ સહ ।
ભીમસેનશ્ચ શૈબ્યશ્ચ શતધન્વા ચ નિર્જિતઃ ॥ ૨૭॥

તથા પર્જન્યઘોષેણ રથેનાદિત્યવર્ચસા ।
અવાક્ષીર્મહિષીં ભોજ્યાં રણે નિર્જિત્ય રુક્મિણમ્ ॥ ૨૮॥

ઇન્દ્રદ્યુમ્નો હતઃ કોપાદ્યવનશ્ચ કશેરુમાન્ ।
હતઃ સૌભપતિઃ શાલ્વસ્ત્વયા સૌભં ચ પાતિતમ્ ॥ ૨૯॥

ઇરાવત્યાં તથા ભોજઃ કાર્તવીર્યસમો યુધિ ।
ગોપતિસ્તાલકેતુશ્ચ ત્વયા વિનિહતાવુભૌ ॥ ૩૦॥

તાં ચ ભોગવતીં પુણ્યામૃષિકાન્તાં જનાર્દન ।
દ્વારકામાત્મસાત્કૃત્વા સમુદ્રં ગમયિષ્યસિ ॥ ૩૧॥

ન ક્રોધો ન ચ માત્સર્યં નાનૃતં મધુસૂદન ।
ત્વયિ તિષ્ઠતિ દાશાર્હ ન નૃશંસ્યં કુતોઽનૃજુ ॥ ૩૨॥

આસીનં ચિત્તમધ્યે ત્વાં દીપ્યમાનં સ્વતેજસા ।
આગમ્ય ઋષયઃ સર્વેઽયાચન્તાભયમચ્યુત ॥ ૩૩॥

યુગાન્તે સર્વભૂતાનિ સઙ્ક્ષિપ્ય મધુસૂદન ।
આત્મન્યેવાત્મસાત્કૃત્વા જગદાસ્સે પરન્તપ ॥ ૩૪॥

નૈવં પૂર્વે નાપરે વા કરિષ્યન્તિ કૃતાનિ તે ।
કર્માણિ યાનિ દેવ ત્વં બાલ એવ મહાદ્યુતે ॥ ૩૫॥

કૃતવાન્પુણ્ડરીકાક્ષ બલદેવસહાયવાન્ ।
વૈરાજભવને ચાપિ બ્રહ્મણા ન્યવસઃ સહ ॥ ૩૬॥

ઇતિ મહાભારતે આરણ્યપર્વણિ ૧૩ અધ્યાયાન્તર્ગતં
અર્જુનકૃતં શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । આરણ્યકપર્વ । અધ્યાય ૧૩/૧૦-૩૬॥

mahAbhArata . AraNyakaparva . adhyAya 13/10-36..

Proofread by PSA Easwaran

*Arjunakritam 2 Shri Krishna Stotram*

pdf was typeset on October 18, 2025

Please send corrections to *sanskrit@cheerful.com*